Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 4 | ISSN : 2581- 6306

# द्वितीयगीतगोविन्दम्



**डॉ० रामसेवकमिश्रः**
सहायक शिक्षक (पी०जी०टी०), संस्कृत,
रा०स० +2 उच्च विद्यालय, केरेडारी,
हजारीबाग (झारखण्ड)

**शोधालेखसारः–** रामगीतगोविन्दम् जयदेवस्य गीति परम्परायां लिखितं मैथिलपण्डित परमरामभक्त श्री जयदेव विरचित षोडशशताब्दे एकं परम रमणीयं काव्यमस्ति। प्रस्तुता कृतिर्गीति काव्यं विद्यते यत्कृते शास्त्रीय पारिभाषिकः शब्दो रामकाव्यमिति समीचीनोस्ति।समग्रं हि काव्यं मर्यादापुरुषोत्तमस्य रामस्यौजस्विचरितेन औतप्रौतं विद्यते। रामचरितं आद्यारीकृत्य अस्मिन् काव्ये कविना बहूनि गीतानि प्रस्तुतानि सन्ति। केषांचित् गीतानां तु पठनसमये पाठकाः भावविमुग्धाः भवन्त्येव

**मुख्यशब्दः–** जयदेवः, द्वितीयगीतगोविन्दम्

**ग्रन्थ परिचयः :–** जानन्ति सर्वे संस्कृत सम्पोषकाः संस्कृतज्ञाश्च भारतीयाऽभारतीयाः विद्वान्सश्च। यत्संस्कृतसाहित्ये गीति चर्चित रचनावल्याः सर्वप्रथम प्रवर्तकः गीतगोविन्दकारजयदेव एव। तदनुतत्सरणि मनुसृत्य अनेकानि गीतिकाव्यानि प्रादुर्भूतानि। अस्यामेव गेयकाव्यपरम्परायां 'रामगीतगोविन्द' मिति सुललितं सरसं चैकमपरं गीतिकाव्यं जयदेवेनापरेण कविना विरचितम्।

**वंशपरिचयः :–** मिथिलायां संस्कृत–साहित्यललामभूताः बहवो हि महाकवयः विद्वांसश्च प्रादूर्भूताः। तेषु हि वत्सगोत्रावतंसोऽयं भैरवानन्दराघवानन्दाख्य नाटकद्वयस्य प्रणेतारः, संस्कृत नाट्य साहित्यस्य प्रसिद्धनाटककारस्य मणिवर्द्धनस्याऽपरनाम धारिणः मणिकः माणिको वा पुत्रः श्री वत्सोपाध्यायात्मजस्य, मेघदूत–द्योतिकाटीकाकारस्य,

किरणावल्याः बहुला टीकाकारस्य पौत्रश्चासीत् अयं रामगीत गोविन्दकारः जयदेव। नेपाल राज्य पुस्तकालये एवं आड्यार पुस्तकालये मद्रासस्थित "राघवानन्द नाटकस्य पुष्पिकायां एतेषां पूर्वजानां परिचयं प्राप्यते।"

"आसीन्मैथिल विप्र वंशतिलकः सांगत्रयीपारगः

सद्धर्माचरण प्रवीण धिषणः षड्दर्शनी मार्मिकः।।[1]

डॉ० जयदेव जानी महोदयेन श्री मन्माणिकमहोदयानां विषये लिखितं वर्तते तद् यथा– Manik Upadhyaya alias Manika or Manu Jha (14th - 15th Cent.)[2]

**स्थान परिचयः** :– रामगीतगोविन्दकारस्यास्य जन्मस्थानविषये किमपि मतवादं नैव परिलक्ष्यते, सर्वे एव कथयन्ति यत् अस्य जन्मस्थानं मिथिला वर्तते। स्वयं जयदेवेन रामगीतगोविन्द नामके काव्ये षष्ठे सर्गे स्वनिवासस्थानस्य चर्चाऽकारि। येन प्रतीयते यदयं मिथिलायाः निवासी आसीत् तथा च तत्रत्येन समस्तराज मण्डलेन सम्मानितः। यथा–

श्री मद्विवदेहनृपदेश विशेष वासो,

निःशेष भूमि पतिमण्डल माननीयः।

एतच्चकार वरगानरस प्रधानं,

काव्यं कविप्रकर मौलिविभूषणं यत्।।[3]

श्रीप्रभात शास्त्रिवर्यैरपि स्वस्य रामगीतगोविन्दटीकायां लिख्यते "अनेन लेखकस्य जन्मस्थानं मिथिलास्ते एतत्तु निर्विवादं सिध्यति परन्तु कृतेनिर्माणकालः तथा तस्य साहाय्येन कृतिकारस्य जन्मकालः केवलमनुमान प्रमाणाधारं निश्चेतव्यौ भवेताम्।"

'कामकेलिकला' इति कामशास्त्रीयः कश्चन ग्रन्थः विरचितः श्रीजयदेवेन तस्मिन् ग्रन्थोऽपि संकेतयति यत् "इति श्री मैथिलपण्डितमणिवर्द्धनात्मजेन सकलकलाविशारदेन जयदेव कविनाकृतं कामकेलिकलायां रतिसोपानम्।" एवं अन्यत्रापि लिखितं वर्तते यथा– "इति पण्डितमणि–माणिक्य–माणिक्यात्मजेन रचितं कामकेलिकलायां मन्मथसोपानम्।"

अस्य जयदेवस्य प्रसङ्गे एका रचना कु० भवानी टी–गावकर महोदयायाः एवं एका डा० प्रमोदरंजन मुखोपाध्यायस्य च प्राप्यते एते अपि स्वस्मिन् प्रबन्धे मिथिला एवास्य जन्मस्थानं स्वीकृतवन्तौ।

**कृतयः** :– जयदेवस्यास्य रचनात्वेन चत्वारि काव्यानि प्रसिद्धानि। तत्राऽलंकारशतक–कामकेलिकला–त्रिपुरसुन्दरीस्तोत्र रामगीतगोविन्दमित्याख्यानि सन्ति। एष्वलंकार शतकमिति चन्द्रालोक इवालंकार शास्त्रीयं वा काव्यं वा न जाने तस्य अनुपलब्धत्वात्। त्रिपुरसुन्दरीस्तोत्रादिभिः साहित्य धुरन्धरत्वं कवित्वकला प्रावीण्यञ्च प्रतीयते। एतच्च स्तोत्रं स्रग्धरा–वृत्तालंकृतं भगवत्या त्रिपुरसुन्दर्याः जयदेवस्य कुलदेवतायाः स्तवनरूपं विद्यते।

**रामगीतगोविन्दमेकः परिचयः :–** गीतिकाव्येऽस्मिन् रामकथाङ्किता विद्यते। कविः कथावस्तुः षट्सर्गेसु, चतुर्विंशति–. प्रबन्धेषु च विभाजितवान्। आरम्भे मङ्गलाचरणानन्तरं कविः कथितवान् यत् यदि रामचरणयोः प्रेम भवेत् अथ काव्यकलाज्ञानाय कौतुकं स्यात् तदा जयदेव कविनिर्मितं गीतगोविन्दमिदं पठेत्–

"यदिरामपदाम्बुजेरतिर्यदि वा काव्यकलासु कौतुकम्।

पठनीयमिदं तदौजसा रूचिरं श्री जयदेवनिर्मितम्।।[4]

प्रस्तुतायां श्री रामगीतगोविन्द कृतौ षट्सर्गाः विद्यन्ते। समग्रं काव्यं मर्यादापुरुषोत्तमस्य ओजस्विचरितेन परिप्लुतं वर्तते। काव्यस्यास्य प्रारम्भः नमस्कारात्मकेन मङ्गलाचरणेन कृतवान् कविः। तदनन्तरं आदिकविं बाल्मीकिं स्मृत्वा[5] प्रवाहपूर्णया सरलया च भाषया भगवतो रामस्य दशावतारवर्णनं कविः 'जय जय राम हरे' इत्यनेन मधुरलयेन भक्तिरसगीतेन कृतवान्। अनेन गीतेन पाठकानां समक्षं भगवतो रामस्य दशावताराणां दिव्यं स्वरूपं मूर्तिमद् भवति। अस्य गीतस्य एकस्मिन् अंशे अनीतिकारिणः शासकान् प्रति आक्रोशस्य अभिव्यक्तिं कुर्वन् कविः लिखितवान्

यवनविदारण! दारुण! हयवाहन! ए!

धृत करवाल! कराल! जय जय राम हरे![6]

प्रथमगीते मीन–कुर्म–वराह–नरहरि–वामन–परशुराम–राम–कृष्ण–बुद्ध– कल्क्यवताराणां स्तुतिः वर्तते। यथा– भगवतः श्रीरामस्य मीनावतारस्य वर्णनं मालवरागेन रूपकतालेन–

स्मृतिवेदाद्युद्धारक! जनतारक ए।

शंखशमन! सुरवन्द्य! जय जय राम! हरे![7] (ध्रुवपदम्)

रामगीतगोविन्दस्य प्रथमे सर्गे प्रणेताऽसौ अध्यात्मरामायण – काकभुशुण्डिरामायण – हनुमन्नाटकानां चर्चामकरोत्।[8] तथा च केषुचित स्थलेषु काव्यस्यास्य साम्यं रामचरितमानसेन साकमपि विद्यते अत एवेदं वक्तुं शक्यते यत् लेखकः तुलसीदासात् विदुषांमते स्वयं तुलसीदास एव रामगीतगोविन्देन प्रभाविता आसीत्।

रामगीतगोविन्द काव्ये षट् सर्गाः विद्यन्ते तत्र मालव–वसन्त–गुर्जरी–आसावरी –रामकरी–देवनाडी – आदिकेषु नवरागेषु पञ्चदशवृत्तेषु पद्यानि सन्ति। तत्र रामगीतगोविन्दस्य द्वितीय सर्गे सप्तमे गीते मिथिलायाः वर्णनं आशावरी रागेण रूपकतालेन कविः कृतवान् यथा–

जयति विदेह नगरमनुरूपम्।

दिशि दिशि राजमानचामीकर

रचित विविध मणियूपम् ।।1।।[9]

तत्र प्रत्येकस्य सर्गस्य नामकरणमपि विद्यते। यथा— सानन्दरघुनन्दनः, विजित परशुरामः, जगन्निवासः, लङ्काप्रवेशः, लङ्काविजयः, रामाभिषेकश्च। द्वितीये सर्गे अष्टम् गीते — धनुर्भङ्गं ज्ञात्वा परशुरामः आगच्छति। गीतस्य प्रारम्भे कविः परशुरामस्य वेशभूषां वर्णितवान्। परशुरामः क्रुध्यति तथा रामस्य शक्तिपरीक्षां विधाय प्रसीदति। नवमगीते धनुराकर्षणादेवागत ज्ञानो मुनिः स्तौतिवसन्तरागेण रूपकतालेन गीतिरियं परममधुरा ललिता च विद्यते कविना लिखितम्—

जय रामचन्द्र कमला—बिहार।

जय कौशलेश करुणावतार।।1।।

रघुवंश कमलकानन—दिनेश।

कन्दर्प कोटि कमनीय वेश।।2।।

कालाग्नि सदृश कोपातिरेक।

गन्धर्वगीत पूरित विवेक।।3।।

नास्त्यत्र कोऽपि सन्देहः यत् रामगीतगोविन्दं नाम्नः गीति काव्यमस्य जयदेवस्याद्भुतचमत्कृति पूर्णा कृति इति प्रलम्बसमस्तपद प्रयोग प्राचुर्येण न केवलं काव्यमिदं स्वकीयां रमणीयतां प्रकाशयत्यपित्वनवच्छिन्नां वाग्विलासधाराञ्च प्रवाहयति। यथा— अत्र सरयू तीरे विहरन्तं रामचन्द्रं प्रति नागरिकोक्तिर्वर्ण्यते। गुर्जरीरागेण रूपकतालेन विहरतीत्यादिना गीतेन—

विहरति हरिरिह सरयूकूले।

पद्मराग चामीकर मरकत—

बद्धविविध तरु कूले।।1।।

सादरमज्जदमितयुवतीकुचकुङ्कुमपिङ्गलनीरे।

शमदमादिसाधनविवेकवशमुनिजनसंकुलतीरे।।2।।

चतुर्दशगीते लक्ष्मणो रामं प्रति प्रयागमहत्वं वर्णयति।[10]

पञ्चमेसर्गे हनुमान देशरागेण रूपकतालेन रजनीयेख्यादिना गीतेन रामं प्रत्याह—

रजनीचररमणी परिवीता।

बालचन्द्र कलिकेव सभीता।।

नाथ! हरे! सीदति सीताऽशोकवने।।1।।

कृशशरीरगतिरतिशयदीना।

भूमिशयाशन सलिलविहीना।।2।।

संस्कृतसाहित्ये भगवतो रामस्यैवंविधस्य शृङ्गारिकस्वरूपस्य चित्रणपरम्परायां तदानीन्तने समये समुत्पन्नो महाकविः तुलसीदासः तेषां कबीनाममर्यादित शृङ्गाररस सिक्तेन वर्णनेन प्रभावितो न बभूव। एतदेव हि कारणं यद् रामगीतगोविन्दे क्वापि जगज्जनन्याः सीतायाः सौन्दर्यवर्णनं शृंगार रसेनौत प्रोतं नोपलभ्यते। एतत् तालबद्धं गीतिकाव्यं अस्ति। प्रथम जयदेवस्य गीतगोविन्दानुकरणोपरि द्वितीय जयदेवेनेदं रामगीतगोविन्दं व्यरचि। गीतगोविन्दस्य वर्ण्यविषयः कृष्णेन सम्बद्धासीत् तथा कृष्णेन सम्बद्धस्य वृन्दावनस्य, यमुनायाः, करीलकुञ्जादेः साङ्गोपाङ्ग चित्रणं कृ तमस्ति। एवमेवास्मिन् गीतिकाव्ये रामेण सम्बद्धायाः अयोध्यायाः, सरय्वाः, चित्रकूटस्य, दण्डकारण्यादीनां स्थानानां मधुर चित्रणमस्ति।

## संदर्भ संकेत :


1. गैर्वाणी सं०त्रै० 40/7
2. Manika's Bhairvanand Natkam - A study
3. रा०गी०गो० 6/4
4. रा०गी०गो० 1/4
5. रा०गी०गो० 1/3
6. रा०गी०गो० 1/10
7. रा०गी०गो० प्रथमंगीतम्
8. रा०गी०गो० 1/3
9. रा०गी०गो० 2/7
10. रा०गी०गो० 3/गीतं चतुर्दशम्